A.C. Joshi Library
P.U. Chandigarh

MSS No. 168 Subject Language

Name of MSS अमरकोश

Author अमर सिंह

Period 1911 विक्रमी Folios 30(00a+001to028+(i))

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

ॐनमः सिद्धं ॥ अ आ इ ई

ॐ नमः सिद्धं ॥ अ आ इ ई उ ऊ

ॐ न

सिद्धं ॥ अ आ इ ई ---

इ ई

प

ॐ श्रीगणेशाय नमः प्रणपरमात्मानं

प्र॰
प्र॰ १

ॐस्वस्तिश्रीगणेशायनमः श्रीसरस्वत्यैनमः दिश्याच्छिवानि
शिवयोस्तिलकायमानंगोरोचनारुचिलंलाटविलोचनंनः श्रा
श्लेषगाढपरिरंभनिपीडनेनपिंडीभवद्भिरिवस्कंदतोनुरागाः १
यस्यज्ञानदयासिंधोरगाधस्यानघागुणाः सेव्यतामक्षयोधीराःस
श्रियेचामृतायच १ समाहृत्यान्यतंत्राणिसंक्षिप्तैःप्रतिसंस्कृतैः
संपूर्णमुच्यतेवर्गैर्नामलिंगानुशासनं २ प्रायशोरूपभेदेनसाह
चर्याच्चकुत्रचित् स्त्रीपुंनपुंसकंज्ञेयंतद्विशेषविधेःक्वचित ३

भेदाख्यानायनद्वंद्वोनैकशेषोनसंकरः कृतोत्रभिन्नलिंगानाम
नुक्तानांक्रमादृते ४ त्रिलिंग्यांत्रिलिंग्यांत्रिष्वितिपदंमिथुनेतु
द्वयोरिति निषिद्धलिंगंशेषार्थंक्रमादृते ४ त्रिलिंग्यांत्रिष्विति
पदंमिथुनेतुद्वयोरिति निषिद्धलिंगंशेषार्थंत्वंताथादिनपूर्व
भाक् ५ स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाः सुर-
लोकोद्योदिवौद्वेस्त्रियांक्लीबेत्रिविष्टपं ६ अमरानिर्जरादेवास्त्रि
दशाविबुधाःसुराः सुपर्वाणःसुमनसःत्रिदिवेशादिवौकसःआ

अ॰
प्र॰
२

दितेयादिविषदोलेखाअदितिनंदनाः आदित्याऋभवोस्वप्नाअम-
र्त्याअमृतांधसः बर्हिर्मुखाः क्रतुभुजोगीर्वाणादानवारयः वृंदारका
दैवतानिपुंसिवादेवतास्त्रियां २८ आदित्याविश्ववसवस्तुषि-
ताभास्वरानिलाः महाराजिकसाध्याश्चरुद्राश्चगणदेवताः ९ वि
द्याधरोप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचोगुह्यकः सिद्धोभूतोऽ
मीदेवयोनयः १० असुरादैत्यदैतेयदनुजेंद्रारिदानवाः शुक्रशिष्-
याः दितिसुताः पूर्वदेवाः सुरद्विषः ११ सर्वज्ञः सुगतोबुद्धोधर्मरा

नस्तथागतः समंतभद्रोभगवान्मारजिल्लोकजिज्जिनः षडभिज्ञोदश

बलोद्वयवादीविनायकः मुनींद्रः श्रीघनः शास्तामुनिः १२ शाक्य

स्तुयः
मुनिस्स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्चसः गौतमश्चार्क

बंधुश्चमायादेवीसुतश्चसः ७ ब्रह्मात्मभूः सुरज्येष्टः परमेष्ठीपि

तामहः हिरण्यगर्भोलोकेशः स्वयंभूश्चतुराननः धाताब्जयोनि

र्द्रुहिणोविरिंचिः कमलासनः स्रष्टाप्रजापतिर्वेधाविधाताविः

श्वसृड्विधिः २४ विष्णुर्नारायणः कृष्णोवैकुंठोविष्टरः

मोत्तानंदः प्रातधृजिः स्थवरो हंसवाहनः १

अ॰
म॰
३

श्रवः दामोदरो हृषीकेशः केशवो माधवः स्वभूर्दैत्यारिः पुंडरीकाक्षो गो
विंदो गरुडध्वजः पीतांवरोच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः उपेंद्र
इंद्रावरजश्चक्रपाणिश्चतुर्भुजः पद्मनाभो मधुरिपुर्वासुदेवस्त्रिवि
क्रमः देवकीनंदनः शौरिः श्रीपतिः पुरुषोत्तमः वनमाली वलि।
ध्वंसी कंसारातिरधोक्षजः विश्वंभरः कैटभजिद्विधुः श्रीवत्सलांछनः
वसुदेवोस्य जनकः स एवानकदुंदुभिः वलभद्रः प्रलंवघ्नो वलदेवो
च्युताग्रजः रेवतीरमणो रामः कामपालो हलायुधः नीलांवरो रौ।

३

हिणेयस्तालांकोमुसलीहलीसंकर्षणःसीरपाणिःकालिंदीभेद
नोबलःमदनोमन्मथोमारःप्रद्युम्नोमीनकेतनःकंदर्पोदर्पकोनं
गःकामःपंचशरःस्मरःशंबरारिर्मनसिजःकुसुमेषुरनन्यजःपु
ष्पधन्वारतिपतिर्मकरध्वजआत्मभूःब्रह्मसूर्विश्वकेतुःस्यात् २१
रतिकामदेवनाम अनिरुद्धऊषापतिःद्वेअनिरुद्धस्यलक्ष्मीप
द्मालयापद्माकमलाश्रीर्हरिप्रियाषट्लक्ष्म्याःशंखोलक्ष्मीपतेःपां
इंदिरालोकमातामाक्षीराब्धितनयारमा ५
चजन्यः १ चक्रंसुदर्शनः १ कौमोदकीगदा १ खड्गोनंदकः १

अ॰ प्र॰ ५

कौस्तुभोमणिः १ गरुत्मान्गरुडस्तार्क्ष्योवैनतेयः खगेश्वरः नागांतको

रथ शिवः

विष्णुसुपर्णः पन्नगाशनः ४ शंभुरीशः पशुपतिः शूलीमहेश्वरः

ईश्वरः सर्वईशानः शंकरः चंद्रशेखरः भूतेशः खंडपरशुर्गिरीशो

गिरिशोमृडः मृत्युंजयकृत्तिवासाः पिनाकीप्रमथाधिपः उग्रः कप

र्दीश्रीकंठः शितिकंठः कपालभृत्वामदेवोमहादेवोविरूपाक्षस्त्रि

लोचनः कृशानुरेताः सर्वज्ञोधूर्जटिर्नीललोहितः हरः स्मरहरो

भर्गस्त्र्यंबकस्त्रिपुरांतकः गंगाधरोंधकरिपुः क्रतुध्वंसीवृषध्वजः

अणिमा महिमा चैव लघिमा गरिमा तथा प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टसिद्धयः

व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ३८ कपर्दोऽस्य जटा

जूटः पिनाकोऽजगवं धनुः प्रमथाः स्युः पारिषदाः २ ब्राह्मीत्याद्या

यास्तु मातरः १ विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा २ उमा

कात्यायनी गौरी काली हैमवतीश्वरी शिवा भवानी रुद्राणी

शर्वाणी सर्वमंगला अपर्णा पार्वती दुर्गा मृडानी चण्डिकांबिका

आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ...

जगन्माता भैरवी च सती दाक्षायणी तथा गणांबिका देवदेवी स्व

र्णचक्रकुलनायका विनायको विघ्नराजो द्वैमातुरगणाधिपाः ३

अ॰
प्र॰
५

ष्येकदंतहेरंबलंबोदरगजाननाः गांगेयः कार्तिकेयः महासेनः

शरजन्मषडाननः पार्वतीनंदनः स्कंदसेनानीरग्निभूर्गुहः बाहुले

यस्तारकजिद्विशाखः शिखिवाहनः षाण्मातुरः शक्तिधरः कु

मारः क्रौंचदारणः इंद्रो मरुत्वान्मघवा विडौजाः पाकशासनः वृद्ध

श्रवाः सुनासीरः पुरुहूतः पुरंदरः जिष्णुर्लेखर्षभः शक्रः शतमन्यु

र्दिवस्पतिः सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा वास्तोष्प

तिः सुरपतिर्बलारातिः शचीपतिः जंभभेदी हरिहयः स्वरा

५

ण्नमुचिसूदनः संक्रंदनोदुश्च्यवनस्तुराषाण्मेघवाहनः आखंड

लः सहस्राक्षऋभुक्षास्तस्यतुप्रियापुलोमजाशचींद्राणीनगरी

त्वमरावती हयःउच्चैःश्रवाःसूतोमातलिर्नंदनंवनं स्यात्प्रा-

सादोवैजयंतोजयंतःपाकशासनिः २ ऐरावतोभ्रमातंगैरावणा-

भ्रमुवल्लभाः ह्रादिनीवज्रमस्त्रीस्यात्कुलिशंभिदुरंपविः श

तकोटिःस्वरुःशंबोदंभोलिरशनिर्द्वयोः १० व्योमयानंविमानो-

स्त्री २ नारदाद्याःसुरर्षयः स्यात्सुधर्मादेवसभा पीयूषममृतंसु

अ॰
प्र॰
९

धामंदाकिनीवियद्गंगास्वर्नदीसुरदीर्घिका ४ मेरुःसुमेरुर्हेमाद्रीरत्न
सानुःसुरालयः ५ पंचैतेदेवतरवोमंदारःपारिजातकःसंतानः
कल्पवृक्षश्चपुंसिवाहरिचंदनम् ५ सनत्कुमारोवैधात्रःस्वर्वै
द्यावश्विनीसुतौनासत्यावश्विनौदस्रावाश्विनेयौचतावुभौ ६ स्त्रियां
बहुष्वप्सरसःस्वर्वेश्याउर्वशीमुखाः २ हाहाहूहूश्चैवमाद्यागंध
र्वास्त्रिदिवौकसाम् २ अग्निर्वैश्वानरोवह्निर्वीतिहोत्रोधनंजयःकृ
पीटयोनिर्ज्वलनोजातवेदास्तनूनपात्बर्हिःशुष्माकृष्णवर्त्मा

९

नोविष्केशउषर्बुधः आश्रयाशोबृहद्भानुः कृशानुः पावकोनलः रोहि
ताश्वोवायुसखः शिखावानाशुशुक्षणिः हिरण्यरेताहुतभुग्दह
नोहव्यवाहनः सप्तार्चिर्दमुनः शुक्रः चित्रभानुर्विभावसुः शुचिर
प्पित्तं २५ और्वस्तुवाडवोवडवानलः २ वह्नेर्द्वयोर्ज्वालकीलावर्चि
र्हेतिः शिखास्त्रियाम् ५ त्रिषुस्फुलिंगोग्निकणः २ संतापः संज्वरः स
मौ २ धर्मराजः पितृपतिः समवर्तीपरेतराट्कृतान्तोयमुनाभ्राता
शमनोयमराड्यमः कालोदंडधरः श्राद्धदेवोवैवस्वतोंतकः १४

अ॰
प्र॰
७

प्रेताधिपःपाशहस्तःकीनाशोमृत्युरर्कजः १४ राक्षसःकोणपःक्रव्या
त्क्रव्यादोस्रपआशिरःरात्रिंचरोरात्रिचरःकर्बुरोनिकषात्मजःयात
धानःपुण्यजनोनैर्ऋतोयातुरक्षसी १५ प्रचेतावरुणःपाशीयादः
सांपतिरप्पतिः ५ श्वसनःस्पर्शनोवायुर्मातरिश्वासदागतिःपृष
दश्वोगंधवहोगंधवाहानिलाशुगाःसमीरमारुतमरुज्जगत्प्राण
समीरणाःनभस्वद्वातपवनपवमानप्रभंजनाः २० प्रकंपनस्वस
मीरोकंजाप्युष्णाकुलोमरुत २४ हस्तापुनाभिकंवातसर्वसंधिग

गः क्रमात्प्राणापानसमानोदानव्यानाः पंचवायवः शरीरस्था
इमे ॥ रंहस्तरसी तु रयः स्यदः जवोथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतं
सत्वरं चपलं तूर्णमविलंबितमाशु च ॥ सततानारताश्रांतसंत-
ताविरतानिशं नित्यानवरताजस्रमप्यथातिशयो भरः अतिवेल
भृशात्यर्थातिमात्रोद्गाढनिर्भरं तीव्रैकांतनिगाढबाढदृढानि
च ॥१४ क्लीबे शीघ्राद्यसत्वे स्यात्त्रिष्वेषां सत्वगामि यत् कुबेरस्त्र्यंब
कसखो यक्षराड्गुह्यकेश्वरः मनुष्यधर्मा धनदो राजराजो धना-

अ॰
प्र॰
८

धिपः किंन्नरेशोवैश्रवणःपौलस्त्योनरवाहनः यक्षैकपिंगैडविड
श्रीदःपुण्यजनेश्वरः ७० अस्योद्यानंचैत्ररथंपुत्रस्तुनलकूवरः १
कैलासःस्थानं १ अलकापूः १ विमानंतुपुष्पकं १ स्यात्किंनरःकिंपुरु
षस्तुरंगवदनोमयुः ४ निधिर्नाशेवधिः १ भेदाःशंखपद्मादयोनिधेः प
द्मोस्त्रियांमहापद्मःशंखोमकरकच्छपौमुकुंदकुंदनीलाश्चखर्वश्च
श्चनिधयोनवनिःशब्दार्णवः इतिस्वर्गवर्गः द्योदिवौद्वेस्त्रियामअ
भ्रंव्योमपुष्करमंबरंनभोंतरिक्षंगगनमनंतंसुरवर्त्मखंवियद्विष्णुपद

८

पदंवातुपुंस्याकाशविहायसी। इतिव्योमवर्गः दिशस्तुककुभः

काष्ठाआशाश्चहरिताश्चता ५ प्राच्यवाचीप्रतीच्यस्ताःपूर्वदक्षि

णपश्चिमाः १ उत्तरादिगुदीचीस्या १ दिश्यंतुत्रिषुदिग्भवे १ इंद्रोव

ह्निःपितृपतिर्नैरृतोवरुणोमरुत्कुबेरईशःपतयःपूर्वादी

नांदिशांक्रमात् १ ऐरावतःपुंडरीकोवामनःकुमदोजनःपुष्प

दंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः १ क्लीबेव्ययंत्वपदिशंदि

शोर्मध्येविदिक्स्त्रियां २ अभ्यंतरंत्वंतरालं १ चक्रवालंतुमंडलंअभ्रंमेघो

अ॰
प्र॰
९

वारिवाहःस्तनयित्नुर्वलाहकःधाराधरोजलधरस्तडित्वान्वारिदों

बभृत्घनजीमूतमुदिरजलमुग्धूमयोनयः १५ कादंबिनीमेघमा

ला२ त्रिषुमेघभ्रियं २ स्तनितंगर्जितंमेघनिर्घोषोरसितादिवः शं

पाशतह्रदाह्रादिन्यैरावत्यःक्षणप्रभातडित्सौदामिनीविद्युच्चंचप (चला)

लापिच १० स्फूर्जथुर्वज्रनिर्घोषे १ मेघज्योतिरिरंमदः १ इंद्रायुधंश

क्रधनुस्तदेवऋजुरोहितं १ वृष्टिर्वर्षं २ तद्विघातेवग्राहावग्रहौसमौ २

धारासंपातआसारः १ शीकरोंबुकणाःस्मृतः १ वर्षोपलस्तुकरको २

स्त

मेघछन्नेह्निदुर्दिनम् १ अंतर्धाव्यवधापुंसित्वंतर्धिरपवारणमपिधान

तिरोधानपिधानाछादनानिच २ हिमांशुश्चंद्रमाश्चंद्रइंदुःकुमदबांध

वः विधुःसुधांशुःशुभ्रांशुरोषधीशोनिशापतिःअब्जोजैवातृ

कःसोमोग्लौर्मृगांकःकलानिधिःद्विजराजःशशधरोनक्षत्रेशोक्ष

त्रेशोक्षपाकरः २ कलातुषोडशोभागो १ बिंबोस्त्रीमंडलंत्रिषु २

भित्तंशकलखंडेवाऽर्द्धोस्त्री ४ र्धंसमेंशके १ चंद्रिकाकौमुदीज्योत्स्ना २

प्रसादस्तुप्रसन्नताकलंकांकौलांछनंचचिह्नंलक्ष्मचलक्षणम् ४

अ॰
प्र॰
१०

सुषमापरमापरमाशोभा १ शोभाकांतिर्द्युतिश्छविः ४ अवश्यायस्तुनी
हार २ स्तुषारस्तुहिनंहिमम्प्रालेयंमिहिकाचा ७ थहिमानीहिमसं
हतिः शीतंगुणे २ तद्वदर्थाःसुषीमः शिशिरोजडः तुषारःशीतलः
शीतोहिमःसप्तान्यलिंगकाः ७ ध्रुवऔत्तानपादिःस्या २ दगस्त्यःकुंभ
संभवः मैत्रावरुणिः २ रस्यैवलोपामुद्रासधर्मिणी १ नक्षत्रमृक्षंभं
ताराःतारकाप्युडुवास्त्रियाम् ५ दाक्षायण्योश्विनीत्यादितारा अश्वयु
गश्विनी २ राधाविशाखा २ पुष्येतुसिद्धतिष्यौ २ श्रविष्ठासमाध॰

निष्ठा २ स्युःप्रोष्ठपदाभद्रपदास्त्रियाः २ मृगशीर्षंमृगशिरास्तस्मिन्ने
वाग्रहायणी ३ इल्वलास्तच्छिरोदेशेतारकानिवसंतियाः १ बृहस्प-
तिःसुराचार्योगीर्पतिर्धिषणोगुरुःजीवआंगिरसोवाचस्पति-
श्चित्रशिखंडिजः ९ शुक्रोदैत्यगुरुःकाव्यउशनाभार्गवःकविः ६
अंगारकःकुजोभौमोलोहितांगोमहीसुतः ५ रौहिणेयोबुधः
सौम्यः ३ समौसौरिशनैश्चरौ २ शनिर्मंदोपगुकालौछायापु
त्रोसितश्चसः ५ तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः ५ स

अ॰ प्र॰ ११

मर्षयोमरीच्यत्रिमुखाश्चित्रशिखंडिनः ।राशीनामुदयोलग्नं ।तेतु

मेषवृषादयः मेषोवृषोथमिथुनंकर्कटःसिंहकन्यकेतुलाथ

वृश्चिकोथधन्वीमकरःकुंभमीनकौसूरसूर्यार्यमादित्यद्वादशात्म

दिवाकराःभास्कराहस्करब्रध्नप्रभाकरविभाकराःभाकराःभास्व

द्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयःविकर्तनार्कमार्तंडमिहिराह

णपूषणःद्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनःविभावसुर्ग्र

हपतिस्त्विषांपतिरहर्पतिभानुर्हंसःसहस्रांशुस्तपनस्सविताऽर

११

विः ३० माठरः पिंगलो दंडश्चंडांशोः पारिपार्श्वकाः १ सूरसूतोरु

णोनूरुः काश्यपिर्गरुडाग्रजः ५ परिवेषस्तु परिधिरुपसूर्यक

मंडले किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः भानुः करो मरी

चिः स्त्रीपुंसयोर्दीधितिः स्त्रियां ११ स्युः प्रभा रुग्रुचिस्त्विड्भा भाश्छवि

द्युतिदीप्तयः रोचिः शोचिरुभे क्लीबे ११ प्रकाशो द्योत आतपः ३ को

ष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वति तिग्मं तीक्ष्णं खरं तद्वत् ३ मृ

गतृष्णा मरीचिका २ इति दिग्वर्गः ॥ कालो दिष्टोप्यनेहापि सम

अ॰ प्र॰ १२

घोण्य ५ पक्षतिप्रतिपदेद्वेइमेस्त्री २ तदाद्यास्तिथयोद्वयोः १ घस्रो
दिनाहनीवातुक्लीवेदिवसवासरौ ५ प्रत्यूषोहर्मुखंकल्यमुषःप्रत्यु
षसीअपिप्रभातंच ६ दिनांतेतुसायंसंध्यापितृप्रसूः २ प्राह्णापरा
ह्णमध्याह्नास्त्रिसंध्य १ मथशर्वरीनिशानिशीथिनीरात्रिस्त्रियामा
क्षणदाक्षपाविभावरीतमस्विन्यौरजनीयामिनीतमी १२ तमिस्रा
तामसीरात्रि २ र्ज्यौत्स्नीचंद्रिकयान्विता १ आगामिवर्तमानाहर्युक्ता
यांनिशिपक्षिणी १ गणरात्रंनिशाबह्व्यः १ प्रदोषोरजनीमुखं २ १३

अर्धरात्रनिशीथौ द्वौ २ द्वौ यामप्रहरौ समौ २ सपर्वसंधिप्रतिपत्पंच॰

दश्योर्यदंतरम् १ पक्षांतौ पंचदश्यौ द्वे १ पौर्णमासी तु पूर्णिमा २

कलाहीना सानुमतिः १ पूर्णे राका निशाकरे १ अमावास्यादर्शः

सूर्येंदुसंगमः ४ सा दृष्टेंदुः सिनीवाली १ सा नष्टेंदुकला कुहूः उप

रागो ग्रहो २ राहुग्रस्ते तु इंदौ च पूष्णि च सोपप्लवोपरक्तौ द्वौ २ अग्न्युत्पात

उपाहितः २ एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरौ समौ १ ते तु त्रिंश

दहोरात्रः १ पक्षस्ते दश पंच च १ पक्षौ पूर्वापरौ शुक्लकृष्णौ मास

अष्टादशनिमेषास्तु काष्ठा त्रिंशत्तु ताः कला॥ तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो

द्वादशास्त्रियां॥२

ग्र॰
१३

स्तनावुभौ २ द्वौ द्वौ माघादिमासौ स्यादृतुः ऽस्तैरयनं त्रिभिः २ अयने द्वे ग

तिरुदग्दक्षिणार्कस्य वत्सरः १ समरात्रदिने काले विषवद्विषुव

त्तत्तु २ मार्गशीर्षः सहा मार्ग आग्रहायणिकश्च सः ४ पौषे

पौषफाल्गुनोस्या तपस्याफाल्गुनिकः ४ तैषसहस्यौ द्वौ २ तपा माघे २ स्याच्चैत्रे चैत्रिको मधुः ३ वैशाखे मा

धवो राधो ३ ज्येष्ठः शुक्रः फाल्गुनो स्यात्तपस्यः फाल्गुनिकः ३

शुचिस्त्वयम् आषाढे २ श्रावणे तु स्यान्नभाः श्रावणिकश्च सः २

स्यर्न्नभस्य प्रोष्ठपदभाद्रभाद्रपदाः समाः ४ स्यादाश्विन इषोप्याश्व

१३

ऊर्जोपि २ स्यात्कार्त्तिकःबाहुलोर्जौकार्त्तिकिके ४ हेमंतः १ शिशि
रोस्त्रियाम् १ वसंतःपुष्पसमयःसुरभिः ३ ग्रीष्मउष्मकःनिदाघउष्णो
पगम उष्णऊष्मागमस्तपाः ७ स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाअथ
शरत्स्त्रियाम् १ षडमीऋतवःपुंसिमार्गादीनांयुगैःक्रमात् १ सं
वत्सरोवत्सरोब्दोहायनोस्त्रीशरत्समाः ६ मासेनस्यादहोरात्रःपै
त्रोँतः १ दैवेयुगसहस्रेद्वेब्राह्मः १ कल्पौतुतौनृणाम् १ मन्वंतरंतु
दिव्यानांयुगानामेकसप्तति १ संवर्तःप्रलयःकल्पःक्षयःकल्पांत

श्रु·
१५ इत्यपि ५ अस्त्रीपंकंपुमान्पाप्मापापंकिल्विषकल्मषम् कलु
षंवृजिनैनोघमंहोदुरितदुष्कृतं १२ स्याद्धर्ममस्त्रियांपुण्यश्रेय
सीसुकृतंवृषः ५ मुत्प्रीतिप्रमदोहर्षःप्रमोदामोदसम्मदास्या
दा४ नंथुर्नंदःशर्मसातसुखानिच १२ श्वःश्रेयसंशिवंभद्रंकल्या
णंमंगलंशुभम् भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियाम्
शस्तंचा १२ थत्रिषुद्रव्येपापंपुण्यंसुखादिच २ मतल्लिमचर्चि का२
काप्रकांडमुद्घतल्लजौप्रशस्तवाचकान्यमूनि ५ यःशुभाव
१५

होविधिदैवंदिष्टंभागधेयंभाग्यंस्त्रीनियतिर्विधिः ६ हेतुर्नाका

रणंबीजं ३ निदानंत्वादिकारणम् २ क्षेत्रज्ञआत्मापुरुषः ३

प्रधानंप्रकृतिःस्त्रियाम् २ विशेषःकालिकोवस्था १ गुणाःस

त्त्वंरजस्तमः ३ जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः ६ प्राणीतु

चेतनोजन्मीजन्तुजन्युशरीरिणः ६ जातिर्जातंचसामान्यंव्य

क्तिस्तुपृथगात्मनः चित्तंतुचेतोहृदयंस्वान्तंहृन्मानसंमनः इति

कालवर्गः बुद्धिर्मनीषाधिषणाधीःप्रज्ञाशेमुषीमतिःप्रेक्षो

अ. प्र. १५

पलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः १४ धीर्धारणावतीमेधा १ संक

ल्पःकर्ममानसम् १ चित्ताभोगोमनस्कारः २ चर्चासंख्याविचारणा ३

अध्याहारस्तर्कऊहो ३ विचिकित्सातुसंशयः संदेहद्वापरौचाथ ४

समौनिर्णयनिश्चयौ २ मिथ्यादृष्टिर्नास्तिकता २ व्यापादोद्रो

हचिंतनं २ समौसिद्धांतराद्धांतौ २ भ्रांतिर्मिथ्यामतिर्भ्रमः ३ संवि

दागूःप्रतिज्ञानंनियमाश्रवसंश्रवाः अंगीकाराभ्युपगमप्रति

श्रवसमाधयः १० मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्र

स्तयोः । मुक्तिकैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् मोक्षो

पवर्गो ऽथाज्ञानमविद्याहंमतिःस्त्रियां २ रूपंशब्दोगंधरसस्प

र्शाश्चविषयाअमीगोचराइंद्रियार्थाश्च हृषीकंविषयींद्रियं २ क

र्मेंद्रियंतुपाय्वादिमनोनेत्रादिधींद्रियम् १ तुवरस्तुकषायो

स्त्री २ मधुरोलवणःकटुतिक्तोम्लश्चरसाःपुंसि ८ तद्वत्सुषड

मीत्रिषुविमर्दोत्थेपरिमलोगंधेजनमनोहरे १ आमोदःसोति

निर्हारी १ वाच्यलिंगत्वमागुणात्समाकर्षीतुनिर्हारी २ सुर

अ॰
प्र॰
१९

भिर्घ्राणतर्पणः इष्टगंधः सुगंधिः स्या ४ दामोदी मुखवासनः २ पू

तिगंधिस्तु दुर्गंधो २ विस्रं स्यादामगंधि यत् २ शुक्लशुभ्रशुचिश्वे

तविशदश्येतपांडुराः अवदातः सितो गौरोवलक्षो धवलोर्जुनः १३

त्पां

हरिणः पांडरः पांडु २ रीषत्पांडुस्तु धूसरः १ कृष्णे नीलासितश्या

मकालश्यामलमेचकाः ७ पीतो गौरो हरिद्राभः ३ पालाशो

हरितो हरित् ३ रोहितो लोहितो रक्तः ३ शोणः कोकनदच्छ

विः १ अव्यक्तरागस्त्वरुणः १ श्वेतरक्तस्तु पाटलः १ श्यावः स्या

कपिशो २ धूम्रधूमलौकृष्णलोहिते २ कडारःकपिलःपिंगपिशंगौ

कद्रुपिंगलौ ५ चित्रंकिर्मीरकल्माषशबलैताश्चकर्बुरे ९ गुणे

शुक्लादयःपुंसिगुणिलिंगास्तुतद्वति इतिधीवर्गः ब्राह्मीतुभारती

भाषागीर्वाग्वाणीसरस्वतीव्याहारउक्तिर्लपितंभाषितंवचनंवचः ३

अपभ्रंशोपशब्दःस्या २ च्छास्त्रेशब्दस्तुवाचकः १ तिङ्सुबंतचयो

वाक्यंक्रियावाकारकान्विता १ श्रुतिःस्त्रीवेदआम्नायः २ त्रयीधर्मस्तु

तद्विधिः १ स्त्रियामृक्सामयजुषीइतिवेदास्त्रयस्त्रयी १ शिक्षेत्यादि

अ: प्र: १७

तेरंग १ ओंकारप्रणवौ समौ २ इतिहासः पुरावृत्तमुदात्ताद्याः
स्त्रयः स्वराः १ आन्वीक्षिकी दंडनीतिस्तर्कविद्यार्थशास्त्रयोः २ आख्या
यिकोपलब्धार्था १ पुराणं पंचलक्षणं २ प्रबंधकल्पना कथा १ प्र
वह्लिका प्रहेलिका २ स्मृतिस्तु धर्मसंहिता १ समाहृतिस्तु संग्रहः २
समस्या तु समासार्था १ किंवदंती जनश्रुतिः २ वार्ता प्रवृत्तिर्वृत्तांत उ
दंतः स्यादथाह्वयः आख्याह्वे अभिधानं च नामधेयं च नाम च १ हू
तिराकारणाह्वानं २ संहूतिर्बहुभिः कृता १ विवादो व्यवहारः स्यात्

उपन्यासस्तु वांमुखं २ उपोद्घात उदाहारः २ शपनं शपथः पुमान् २
प्रश्नोनुयोगः पृच्छा च ३ प्रतिवाक्योत्तरे समे २ मिथ्याभियोगोभ्या-
ख्यानं २ मथ मिथ्याभिशंसनं अभिशापः २ प्रणादस्तु शब्दः स्या-
दनुरागजः १ यशः कीर्तिः समाज्ञा च ३ स्तवः स्तोत्रं नुतिः स्तुतिः ४
आम्रेडितं द्विस्त्रिरुक्तं उच्चैर्घुष्टं तु घोषणा २ काकुः स्त्रियां वि-
कारो यः शोकभीत्यादिभिर्ध्वनेः १ अवर्णाक्षेपनिर्वादपरीवादा-
पवादवत् उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे ९ पारुष्य

अ॰ १॰ मतिवादः स्यात् तुर्त्सनं तपकारगीः यः समनिंदमुपालंभस्तत्रस्या
१९ त्परिभाषणं १ तत्र तादाश्याप्रायः स्यादाक्रोशो मैथुनं प्रति स्यादा
भाषणमालापः प्रलापोनर्थकंवचः १ अनुलापो मुहुर्भाषा
विलापः परिदेवनं २ विप्रलापो विरोधोक्तिः २ संलापो भाषणं
मिथः १ सुप्रलापः सुवचनं २ मपलापस्तु निन्हवः २ संदेशवा
ग्वाचिकं स्यात् २ वाग्भेदास्तु त्रिषु त्तरे १ रुषती वागकल्याणी २ स्या
त्कल्या तु शुभात्मिका २ अत्यर्थमधुरं सांत्वं २ संगतं हृदयंगमं २ नि

ष्ठुरंपरुषं २ग्राम्यमश्लीले २ सूनृतंप्रियेसत्ये १ थसंकुलंक्लिष्टे

परस्परपराहते २ लुप्तवर्णपदंग्रस्तं २निरस्तंत्वरितोदितं २ अं

बूकृतंसनिष्ठीव १ मबद्धंस्यादनर्थकं अनक्षरमवाच्यंस्यादाहतं

तुमृषार्थकं २ अथम्लिष्टमविस्पष्टं २ वितथंत्वनृतंवचः २ सत्यं

तथ्यमृतंसम्य ४ गमूनित्रिषुतद्वति शब्दे निनादनिनदध्वनि

ध्वानरवस्वनाः १ स्वाननिर्घोषनिर्ह्रादनादनिःस्वाननिःस्वनाः आ

रावासंरावविरावा १० अथमर्मरः स्वनितेवस्त्रपर्णानां १ भू

२ स्यात निर्घोषनिर्ह्राद नादनिस्वाननिस्वनाः २

अ॰ प्र॰ १९

षणानांतुशिंजितं १ निक्वाणोनिक्वणःक्वाणःक्वणःक्वणनमि
त्यपिवीणायाःक्वणितेप्रादेःप्रक्वाणप्रक्वणादयः ५ कोलाहलः
कलकल २ स्तिरश्चांवाशितंरुतं १ स्त्रीप्रतिश्रुत्प्रतिध्वाने २ गीतं
गानमिमेसमे २ इतिशब्दादिवर्गः निषादर्षभगांधारषड्जमध्य
मधैवताः पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थिताःस्वराः १ काकली
तुकलेसूक्ष्मे १ ध्वनौतुमधुरास्फुटेकलो १ मंद्रस्तुगंभीरे १ तारो
त्युच्चै १ स्त्रयस्त्रिषु १ समन्वितलयस्त्वेकतालोवीणातुवल्लकी

विपंची २ सा तु तंत्रीभिः सप्तभिः परिवादिनी १ ततं वीणादिकं वाद्य १
मानद्धं मुरजादिकं १ वंशादिकं तु सुषिरं १ कांस्यतालादिकं घनं १
चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं २ मृदंगा मुरजा २ भेदास्त्व
ङ्क्यालिंग्योर्ध्वकास्त्रयः २ स्याद्यशःपटहो ढक्का २ भेरी स्त्री दुंदुभिः पु
मान् आनकः पटहोस्त्री स्या २ कोणो वीणादिवादनं २ वीणादंडः
प्रवालः स्या २ ककुभस्तु प्रसेवकः २ कोलंबकस्तु कायोस्या १ उप
नाहो निबंधनं २ वाद्यप्रभेदा डमरुमड्डुडिंडिमझर्झराः मर्दलः

अ॰ प्र॰ २॰

पणवोस्मेच ६ नर्त्तकीलासिकेसमे २ विलंबितंद्रुतंमध्यंतत्तमोघो
घनंक्रमात् ३ तालःकालक्रियामानंलयःसाम्य १ मथास्त्रियां॰
तांडवंनटनंनाट्यंलास्यंनृत्तंचनर्त्तने ६ तौर्यत्रिकंनृत्तगीतवा
द्यंनाट्यमिदंत्रयं १ भ्रकुंसश्चभ्रुकुंसश्चभ्रूकुंसश्चेतिनर्त्तकःस्त्रीवेष
धारीपुरुषो ३ नाट्योक्तौगणिकाज्जुका १ भगिनीपतिरावुत्तो १ भा
वोविद्वा १ नथावुकःजनको १ युवराजस्तुकुमारोभर्तृदारकः २
राजाभट्टारकोदेव २ स्तत्सुताभर्तृदारिका १ देवीकृताभिषेकायां १

मितरासुतुभट्टिनी १ अब्रह्मण्यमवध्योक्तौ १ राजस्यालस्तुराष्ट्रि-
यः १ अंबामाताथबालास्याद्वासूरार्यस्तुमारिषः १ अत्तिकाभगिनी
ज्येष्ठा १ निष्ठानिर्वहणेसमे २ हंडेहंजेहलाह्वाननीचांचेटींस-
खींप्रति १ अंगहारोंगविक्षेपो १ व्यंजकाभिनयौसमौ २ निर्वृत्ते-
त्वंगसत्वाभ्यांद्वेत्रिष्वांगिकसात्विके २ शृंगारवीरकरुणाद्भुत
हास्यभयानकाः बीभत्सरौद्रौचरसाः १ शृंगारःशुचिरुज्वलः ३ उत्सा
हवर्धनोवीरः १ कारुण्यंकरुणाघृणाः कृपादयानुकंपाचा-

अ॰
प्र॰
२१

प्यनुक्रोशोप्य ७ थोहसः हासोहास्यंच २ बीभत्संविकृतं २ त्रिष्वि

दंद्वयम् २ विस्मयोद्भुतमाश्चर्यंचित्रमप्यथभैरवम् दारुणंभी

भीष्मं षणंघोरंभीमंभयानकम् भयंकरंप्रतिभयं ९ रौद्रंतूग्रं २ ममी

भी त्रिषुचतुर्दशदरस्त्रासोतिर्भीःसाध्वसंभयं ६ विकारोमानसोभा

वो १ नुभावोभावबोधकः २ गर्वोभिमानोहंकारो ३ मानश्चित्त

समुन्नतिः २ अनादरःपरिभवःपरीभावस्तिरस्क्रियारीढावमा

ननावज्ञाप्यवहेलनमसूर्क्षणं ९ मंदाक्षंह्रीस्त्रपाव्रीडालज्जा ५ सा

२१

यत्नपामतः १ क्षांतिस्तितिक्षा २ अभिध्यानं परस्वविषये स्पृहा १ अ

क्षांतिरीर्ष्या २ असूयातु दोषारोपो गुणेष्वपि १ वैरं विरोधो विद्वेषो ३

मन्युशोकौ तु शुक्स्त्रियां ३ पश्चात्तापोऽनुतापश्च विप्रतीसार इ

त्यपि ३ कोपक्रोधामर्षरोषाः प्रतिघा रुट्क्रुधौ स्त्रियौ ७ शुचौ

तु चरिते शीलं १ उन्मादश्चित्तविभ्रमः २ प्रेमा ना प्रियता हार्दं प्रे

मस्नेहो ५ अथ दोहदः इच्छा कांक्षा स्पृहेहा तृड्वांछा लिप्सा मनोरथः

कामोऽभिलाषस्तर्षश्च १२ सोऽत्यर्थं लालसा द्वयोः १ उपाधिर्ना धर्म

प्र॰
म॰
२२

चिंता २ पुंसाधिर्मानसीव्यथा २स्याच्चिंतास्मृतिराध्यान २ मुत्कंठोत्क
लिकेसमे २ उत्साहोध्यवसायःस्या २ त्सवीर्यमतिशक्तिभाक् १
कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवेकुसृतिर्निकृतिःशाठ्यं ५
कौतुकंचकुतूहलम् कौतूहलंकौतुकंच ४ प्रमादोनवधानता १
स्त्रीणांविलासविब्बोकविभ्रमाललितंतथा हेलालीलेत्यमीहा
वाःक्रियाशृंगारभावजाः ८ द्रवःकेलिपरीहासःक्रीडालीलाचनर्म
च ५ व्याजोपदेशोलक्षंच २ क्रीडाखेलाचकूर्दनम् ३ घर्मोनिदाघः

खेदः स्या २ प्रलयो नष्टचेष्टता अवहित्थाकारगुप्तिः संवेगसं
भ्रमौ २ स्यादाच्छुरितकं हासः सोत्प्रासः २ स मनाक्स्मितम् २ म
ध्यमः स्याद्विहसितं २ रोमांचो रोमहर्षणम् २ क्रंदितं रुदितं क्रुष्ट
म् २ जंभस्तु त्रिषु जंभणम् २ विप्रलंभो विसंवादो २ रिंखनं स्खल
नं समे २ स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ५ तंद्री प्रमी
ला २ भ्रकुटिर्भ्रुकुटिः भ्रूकुटिः स्त्रियाम् २ अदृष्टिः स्यादसौम्ये २
क्ष्णि २ संसिद्धिप्रकृती त्विमे स्वरूपं च स्वभावश्च निसर्गश्चा ५ थवे

अ॰ प्र॰ २३ पथुः कंपो २ थ क्षण उद्धर्षो मह उद्धव उत्सवः ५ इति नाट्यवर्गः अ
धोभुवनपातालं बलिसद्म रसातलम् नागलोको ५ थ कुहरं सुषि
रं विवरं बिलम् छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं वपा सुषिः ११ गर्त्ताव
टौ भुवि श्वभ्रे २ सरंध्रे सुषिरं त्रिषु १ अंधकारो स्त्रियां ध्वांतं तमिस्रं ति
मिरं तमः ५ ध्वांते गाढे ऽंधतमसं क्षीणे ऽवतमसं तमः विष्वक् संतमसं १
नागाः काद्रवेया २ स्तदीश्वरः शेषो नंतो २ वासुकिस्तु सर्पराजो २
थ गोनसे तिलित्सः स्या २ दजगरे शयुर्वाहस इत्युभौ २ अलगर्दो ज

लव्यालः २ समौराजिलडुंडुभौ २ मालुधानोमातुलाहिः २ निर्मुक्तो

मुक्तकंचुकः २ सर्पः पृदाकुर्भुजगोभुजंगोहिर्भुजंगमः आशीविषो

विषधरश्चक्रीव्यालः सरीसृपः कुंडलीगूढपाच्चक्षुःश्रवाःका

कोदरः फणीदर्वीकरोदीर्घपृष्ठोदंदशूकोविलेशयः उरगः पन्न

गोभोगीजिह्मगः पवनाशनः त्रिष्वाहेयंविषास्थ्यादि १ स्फटायांतु

फणाद्वयोः २ समौकंचुकनिर्मोकौ २ क्ष्वेडस्तुगरलंविषम् ३ पुंसि

क्लीबेचकाकोलकालकूटहलाहलाः सौराष्ट्रिकः शौक्लिकेयो

अ॰ प्र॰ २५

ब्रह्मपुत्रः प्रदीपनः दारदो वत्सनाभश्च विषभेदा अमी नव ९ विषवैद्यो जां
गुलिको २ व्यालग्राह्यहितुंडिकौ २ इति पातालभोगिवर्गौ स्यान्नार
कस्तु नरको निरयो दुर्गतिः स्त्रियाम् ४ तद्भेदास्तपनावीचिमहा
रौरवरौरवाः संहारः कालसूत्रं चेत्याद्याः ६ सत्त्वास्तु नारकाः प्रेता १
वैतरणी सिंधुः १ स्यादलक्ष्मीस्तु निर्ऋतिः २ विष्टिराजूः २ कारणा त
यातना तीव्रवेदना ३ पीडा बाधा व्यथा दुःखं ४ आमनस्यं प्रसूतिज
म् स्यात्कष्टं कृच्छ्रमाभीलं ३ त्रिष्वेषां भेद्यगामि यत् इति नरकाः १

समुद्रोब्धिरकूपारः पारावारः सरित्पतिः उदन्वानुदधिः सिंधुः सरस्वा

न्सागरोर्णवः रत्नाकरोजलनिधिर्यादसांपतिरपांपति ॥५॥ क्षीरोदोल तस्य प्रभेदाः

वणोदस्तथापरे आपः स्त्रीभूम्निवार्वारिसलिलंकमलंजलम् प

यः कीलालममृतंजीवनंभुवनंवनम् कवंधमुदकंपाथः पुष्करं

सर्वतोमुखम् अंभोर्णस्तोयपानीयनीरक्षीरांबुशंबरम्मेघपु

ष्पंघनरस २३ त्रिषुद्वेआप्यमप्मयम् पम् २ भंगास्तरंगऊर्मिर्वास्त्रि

यांवीचि ४ रथोर्मिषुमहत्सूल्लोलकल्लोलौ २ स्यादावर्तोंभसांभ्र

अ॰
वा॰
२५

मः २ पृषंतिविंदुपृषताः पुमांसोविप्रुषस्त्रियः ४ चक्राणिपुटभेदाःस्यु २
र्भ्रमाश्चजलनिर्गमाः २ कूलंरोधश्चतीरंचप्रतीरंचतटंत्रिषु ५ पा
रावारेपरार्वाचीतीरे २ पात्रंतदंतरम् १ द्वीपोस्त्रियामंतरीपंयदंतर्वा
रिणस्तटम् २ तोयोत्थितंतत्पुलिनं १ सैकतंसिकतामयं २ नि
षद्वरस्तुजंबालःपंकोस्त्रीशादकर्दमौ ५ जलोच्छ्वासाःपरीवाहाः २ कू
पकास्तुविदारकाः २ नाव्यंत्रिलिंग्यंनौतार्ये स्त्रियांनौस्तरणिस्तरिः २
उडुपंतुप्लवःकोलः २ स्रोतोंबुसरणंस्वतः आतरस्तरपण्यंस्यात् २

द्रोणीकाष्ठांबुवाहनी २ सांयात्रिकः पोतवणिक्कर्णधारस्तुनावि
कः २ नियामकाः पोतवाहः २ कूपको गुणवृक्षकः २ नौकादंडः क्षे
पणी स्या २ दरित्रं केनिपातकः २ अभ्रिः स्त्रीकाष्ठकुद्दालः २ सेक
पात्रं तु सेचनं २ यानपात्रं तु पोतो २ ब्धिभवे त्रिषु समुद्रियम् २ सामु
द्रिको मनुष्योब्धिभवः २ सामुद्रिका तु नौः क्लीबेर्धनावं नावोर्धे २ अती
तनौके तिनु त्रिषु २ त्रिष्वागाधात्प्रसन्नोच्छः २ कलुषोनच्छ आवि
लः २ निम्नं गभीरं गंभीरं २ मुत्तानं तद्विपर्यये २ अगाधमतलस्पर्शे २

अ॰
प्र॰
२५

कैवर्त्तेदाशधीवरौ २ आनायःपुंसिजालंस्यात् २ शणसूत्रंपवित्रकं २
मत्स्याधानीकुवेणीस्या २ द्बडिशंमत्स्यवेधनम् २ पृथुरोमाझषो
मत्स्योमीनोवैसारिणोऽण्डजःविसारःशकलीचा २ थगंडकःशक
लार्भकः २ सहस्रदंष्ट्रःपाठीनः २ उलूपीशिशुकःसमौ २ नलमी
नश्चिलिचिमःप्रोष्ठीतुशफरीद्वयोः २ क्षुद्राण्डमत्स्यसंघातःपोताधा
न २ मथोझषःरोहितोमद्गुरःशालोराजीवःशकुलस्तिमिःतिमिं
गिलादयश्चा थयादांसिजलजन्तवः २ तद्भेदाःशिशुमारोद्रशंक

वोमकरादयः ४ स्यात्कुलीरःकर्कटकः २ कूर्मेकमठकच्छपौ ३ ग्राहो
वहारो २ नक्रस्तुकुंभीरो २ थमहीलतागंडूपदाकिंचुलकाः ३ निहा
कागोधिकासमे २ रक्तपास्तुजलौकायांस्त्रीभूम्निजलौकसः ३
मुक्तास्फोटःस्त्रियांशुक्तिः २ शंखःस्यात्कंबुरस्त्रियाम् २ क्षुद्रशंखाः
शंखनकाः २ शंबूकाजलशुक्तयः भेकेमंडूकवर्षाभूशालूरप्लव
दर्दुराः ६ शिलीगंडूपदी २ भेकीवर्षाभ्वी २ कमठीडुलिः २ मद्गु
रस्यप्रियाशृंगी १ दुर्नामादीर्घकोशिका २ जलाशयोजलाधारः २

त्वगाधजलो ह्रदः १ आहावस्तु निपानं स्यादुपकूपजलाशये २ पुंसि

अ॰ को॰ २७ वांधुः प्रहीः कूपः उदपानं तु पुंसि वा ४ नेमिस्त्रिकास्य १ वीनाहो मुख

बंधनमस्य यत् १ पुष्करिण्यां तु खातं स्यादखातं देवखातकम् २

पद्माकरस्तडागो २ स्त्री कासारः सरसी सरः ३ वेशंतः पल्वलं चाल्प

सरो २ वापी तु दीर्घिका २ खेयं तु परिखा २ धारस्त्वंभसां यत्र धारणं १

स्यादालवालमालवालमावापो २ थ नदी सरित् १ तरंगिणी शैवलिनी

तटिनी ह्रादिनी धुनी स्रोतस्वती द्वीपवती स्रवंती निम्नगापगा १२

गंगाविस्नुपदीजन्हुतनयासुरनिम्नगाभागीरथीत्रिपथगात्रिस्रो
ताभीष्मसूरपिकालिंदीसूर्यतनयायमुनाशमनस्वसा ५ रेवातुन
र्मदासोमोद्भवामेकलकन्यका ६ करतोयासदानीरा २ बहुदासै
तवाहिनी २ शतद्रुस्तुशुतुद्रुःस्या २ विपाशातुविपाट्स्त्रियां २
शोणोहिरण्यवाहःस्या २ त्कुल्याल्पाकृत्रिमासरित् (शरावती
वेत्रवतीचंद्रभागासरस्वतीकावेरीसरितोन्याश्च (संभेदःसिंधु
संगमः (द्वयोःप्रणालीपयसःपदव्यां (त्रिषुतूत्तरौदेविकायां

अ॰ को॰ २८

सरस्यांचभवेदाविकसारवे २ सौगंधिकंतुकह्लारं २ हल्लकंरक्तसंधि
कम् २ स्यादुत्पलंकुवलय २ मथनीलांबुजन्मच इंदीवरंचनीलेस्मि
न् २ सितेकुमदकैरवे २ शालूकमेषांकंदःस्या१ द्वारिपर्णीतुकुं
भिका २ जलनीलीतुशैवालंशैवलो २ थकुमद्वतीकुमदिन्यां २
नलिन्यांतुबिसिनीपद्मनीमुखाः २ वापुंसिपद्मंनलिनमरविंदं
महोत्पलम् सहस्रपत्रंकमलंशतपत्रंकुशेशयं पंकेरुहंताम
रससारसंसरसीरुहम् बिसप्रसूनराजीवपुष्करांभोरुहाणिच १९

पुंडरीकंसिताम्भोज २ मथरक्तसरोरुहे २।रक्तोत्पलंकोकनदं
नालानाल २ मथास्त्रियाम् मृणालंबिस २ मब्जादिकदंबेषंडम
स्त्रियाम् ।करहाटःशिफःकंदः ३ किंजल्कःकेसरोस्त्रियाम् २ सं
वर्तिकानवदलं २ बीजकोशोवराटकः । इतिवारिवर्गः ३ उक्तं
स्वर्व्योमदिक्कालधीशब्दादिसनाट्यकम् पातालभोगिनरकं
वारिचैषांहिसंगतम् इत्यमरसिंहविरचितेअमरकोशेस्वर्गादि
कांडःप्रथमःसमाप्तः संवत् १८१२ चैत्रयीअष्टम्या ॥ ॥

कर्मैप्रत्याहारग्रहणाय

डोऽनेन उक्तवर्णाः सवर्णाः सवर्णसमुच्चयेन वर्णाः अचः परिगणाः संपतने चपनः
जेषांसमानसंज्ञांचविधीयते

२९

(141)

168

168